निधापयेत् । तस्मादुष्णाम्बुना मात्रं प्रागुक्तं योजये-
त्ततः । शुक्लं सर्जरसोपेताः सर्षपा एलाबालुकैः । सुवेगा
तस्करपुरैः कुसुमैरर्जुनस्य तु । धूपो वासगृहे हन्ति विषं
स्थावरजङ्गमम् । न तत्र कीटा न विषं दर्दुरा न
सरीसृपाः । न कृत्याकर्म्मणाञ्चापि धूपोऽयं यत्र दह्यते ।
कल्पितैश्चन्दनक्षीरपलाशद्रुमवल्कलैः । मूर्व्वैलावालुसर-
सानाकुलीतण्डुलीयकैः । क्वाथः स विषकार्य्येषु काक-
माचीयुतो हितः । रोचनापत्रनेपालीकुङ्कुमैस्तिलकान्
वहन् । विषैर्न बाध्यते स्याच्च नरनारीन्दृपप्रियः ।
चूर्णैर्हरिद्रामञ्जिष्ठाकिणिहीकणनिम्बजैः । दिग्धं निर्वि-
षतामेति गात्रं सर्व्वविषार्द्दितम् । शिरीषस्य फलं पत्रं
पुष्पं त्वङ्मूलमेव च । गोमूत्रघृष्टं ह्यगदः सर्व्वकर्म्मकरः
स्मृतः । एकवीर ! महौषध्यः शृणु चातः परं नृप !
वन्ध्या कर्कोटकी राजन् ! विष्णुक्रान्ता तथोत्कटा ।
शतमूली सितानन्दा बला मोचा पटोलिका । सोमा-
पिण्डा निशा चैव तथा दग्धरुहा च या । स्थले कम-
लिनी या च विशाली शङ्खमूलिका । चण्डाली हस्ति-
मगधा गोऽजापर्णी करम्भिका । रक्ता चैव महारक्ता
तथा वर्हिशिखा च या । कोशातकी नक्तमालं प्रिया-
लञ्च सुलोचनी । वारुणी वसुगन्धा च तथा वै गन्धना-
कुली । ईश्वरी शिवगन्धा च श्यामला वंशनालिका । जतु-
काली महाश्वेता श्वेता च मधुयष्टिका । वज्रकः पारि-
भद्रश्च तथा वै सिन्धुवारकाः । जीवानन्दा वसुच्छिद्रा
नतनागरकण्टका । नालञ्च जाली जाती च तथा च
वटपत्रिका । कार्त्तस्वरं महानीला कुन्दुरुर्हंसपादिका ।
मण्डूकपर्णी वाराही द्वे तथा तण्डुलीयके । सर्पाक्षी
लवली ब्राह्मी विश्वरूपा सुखाकरा । रुजापहा वृद्धिकरी
तथा चैव विशल्यदा । पत्रिका रोहिणी चैव नक्तमाला
महौषधी । तथामलकवन्दाकं श्यामाचित्रफला च या ।
काकोली क्षीरकाकोली पीलुपर्णी तथैव च । केशिनी
वृश्चिकाली च महानागा शतावरी । गरुडी च तथा
वेगा जले कुमुदिनी तथा । स्थले चोत्पलिनी या च
महाभूमिलता च या । उन्मादिनी सोमराजी सर्व्व-
रत्नानि पार्थिव ! । विशेषान्मरकतानि कीटपक्षं विशे
षतः । जीवजाताश्च मणयः सर्व्वे धार्य्याः प्रयत्नतः ।
रक्षोघ्नाश्च विषघ्नाश्च कृत्यावेतालनाशनाः । विशेषान्नर
नागाश्च गोखरोष्ट्रसमुद्भवाः । सर्पतित्तिरगोमायुबस्त-
मण्डूकजाश्च ये । सिंहव्याघ्रर्क्षमार्जारद्वीपिवानरसंभवाः ।

कपिञ्जला गजा वाजिमहिषैणभवाश्च ये । इत्येवमेतैः
सकलैरुपेतन्द्रव्यैश्च सर्व्वैः स्वपुरं सुरक्षितम् । राजा
वसेत्तत्र गृहं सुशुभ्रं गुणान्वितं लक्षणसंप्रयुक्तम् ।
मनुरुवाच “राजारक्षारहस्यानि यानि दुर्गे निधापयेत् ।
कारयेद्वा महीभर्त्ता ब्रूहि तत्त्वानि तानि च । मत्स्य-
उवाच । शिरीषोदुम्बरशमीवीजपूरं घृतप्लुतम् । क्षुद्योगः
कथितो राजन् ! मासार्द्धं तु पुरातनैः । कशेरुफल-
मूलानि इक्षुमूलं तथा बिसम् । दूर्व्वाक्षीरघृतैर्मण्डः सिद्धो
ऽयं मासिकः परः । नरं शस्त्रहतं प्राप्तो न तस्य
मरणं भवेत् । कल्माषवेणुना तत्र जनयेत्तु विभावसुम् ।
गृहे त्रिरपसव्यन्तु क्रियते यत्र पार्थिव ! । नान्योऽग्नि-
र्ज्ज्वलते तत्र नात्र कार्य्या विचारणा । कार्पासास्थ्या भुज-
ङ्गस्य तेन निर्म्मोचनं भवेत् । सर्पनिर्व्वासने धूपः प्रशस्तः
सततं गृहे । सामुद्रसैन्धवयवा विद्युद्दग्धा च मृत्तिका ।
तयानुलिप्तं यद्वेश्म नाग्निना दह्यते नृप ! । दिवा च
दुर्गे रक्ष्योऽग्नि र्वाति वाते विशेषतः । विषाच्च रक्ष्यो नृप-
तिस्तत्र युक्तिं निबोध मे । क्रीडानिमित्तं नृपतिर्धार-
येन्मृगपक्षिणः । अन्नं वै प्राक् परीक्षेत वह्नौ चान्यतरेषु
च । वस्त्रं पुष्पमलङ्कारं भोजनाच्छादनं तथा । नाप-
रीक्षितपूर्व्वन्तु स्पृशेदपि महामतिः । स्याच्चासौ वक्त्रसन्तप्तः
सोद्वेगञ्च निरीक्षते । विषदोऽथ विषं दत्तं यच्च तत्र
परीक्षते । स्रस्तोत्तरीयो विमनाः स्तम्भकुड्यादिभिस्तथा ।
प्रच्छादयति चात्मानं लज्जते त्वरते तथा । भुवं विलि-
खति ग्रीवां तथा चालयते नृप ! । कण्डूयति च
मूर्द्धानं परिलेह्याननन्तथा । क्रियासु त्वरितो राजन् !
विपरीतास्वपि ध्रुवम् । एवमादीनि चिह्नानि विषदस्य
परीक्षयेत् । समीपे विक्षिपेद्वह्नौ तदन्नं त्वरयान्वितैः ।
इन्द्रायुधसवर्णन्तु रूक्षं स्फोटसमन्वितम् । एकावर्त्तन्तु
दुर्गन्धि भृशञ्चटचटायते । तद्धूमसेवनाज्जन्तोः शिरोरो-
गश्च जायते । सविषेऽन्ने विलीयन्ते न च पार्थिव !
मक्षिकाः । निलीनाश्च विपद्यन्ते संस्पृष्टे सविषे तथा ।
विरज्यति चकोरस्य दृष्टिः पार्थिवसत्तम ! । विकृतिञ्च
स्वरो याति कोकिलस्य तथा नृप ! । गतिः स्खलति
हंसस्य भृङ्गराजश्च कूजति । क्रौञ्चो मदमथाभ्येति
कृकवाकुर्विरौति च । विक्रोशति शुको राजन् ! सारिका
वमते ततः । चामीकरोऽन्यतो याति मृत्युं कारण्डव
स्तथा । मेहते वानरो राजन् ! ग्लायते जीवजीवकः ।
हृष्टरोमा भवेद्बभ्रुः पृषतश्चैव रोदिति । हर्षमायाति च